## संस्कृतबालादर्शे **अष्टादशः पाठः ॥ १८ ॥**

## क्रीडा

**इदानीम्।** **तदानीम्।** **कन्दुकः।** **चर्मः।**

इदानीं सायाह्नः। पश्य ! अस्मिन् क्रीडाङ्गणे षट् बालकाः कन्दुकेन क्रीडन्ति। कन्दुकः चर्मणा निर्मितः वातेन पूरितश्च। अतः स ताड्यमानः उत्पतति ॥

ते बालकाः इतस्ततो धावन्तः हस्तेन पादेन च कन्दुकं ताडयन्ति। एको बालकः भूमौ उपविष्टः। स चिरं क्रीडनेन श्रान्तोऽभवत्। तस्य गात्रं स्विद्यति (sweats)। स मुहूर्तं विश्रम्य भूयोऽपि क्रीडिष्यति ॥

यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न वर्तिष्यते (न वर्तिष्यते = will not be)। तदानीम् एते गृहं व्रजिष्यन्ति ॥

**क) प्रश्नाः - -**

१। इदानीं कः स्मयः ?

इदानीं सायाह्नः।

२। बालकाः कुत्र केन क्रीडन्ति ?

बालकाः क्रीडाङ्गणे कन्दुकेन क्रीडन्ति।

३। कन्दुकः केन निर्मितः केन पूरितश्च।

कन्दुकः चर्मणा निर्मितः वातेन पूरितश्च।

४। स ताड्यमानः किं करोति ?

स कन्दुकः ताड्यमानः उत्पतति।

५। ते बालकाः किं कुर्वन्तः कन्दुकं ताडयन्ति ?

ते बालकाः इतस्ततो धावन्तः हस्तेन पादेनच कन्दुकं ताडयन्ति।

६। उपविष्टः बालः कथं श्रान्तः अभवत् ?

उपविष्ट बालः चिरं क्रीडनेन श्रान्तः अभवत्।

(उपविष्टः seated, ***pp.*** of उपविश् to sit)

७। सः किं करिष्यति ?

सः बालकः मुहूर्तं विश्रम्य भूयोऽपि क्रीडिष्यति।

८। प्रकाशः कदा न वर्तिष्यते ?

यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न वर्तिष्यते।

९। तदानीमेते किं किरिष्यन्ति ?

गृहं व्रजिष्यन्ति (गमिष्यन्ति)।

**ख) ' एक , द्वि ' अनयोः रूपैः वाक्यानि पूरयत। - -**

| | |
|---|---|
| १। अत्र ___ गजः तिष्ठति। | अत्र <u>एकः</u> गजः तिष्ठति। |
| २। इह ___ धेनुः तृणं चरति। | इह <u>एका</u> धेनुः तृणं चरति। |
| ३। मनुष्यानां ___ हतौ स्तः। | मनुष्यानां <u>द्वौ</u> हतौ स्तः। |
| ४। ___ नार्यौ जलाय गच्छतः। | <u>द्वे</u> नार्यौ जलाय गच्छतः। |

**ग)  ‘ गम् - गछ् ’ धातोः ' लृट् ' (future tense) रूपाणि । - -**

| | | | |
|---|---|---|---|
| प्र.पु. | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| म.पु. | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उ.पु. | गमिष्यामि | गमिष्यावः | गमिष्यामः |

**घ)  धावन् , तिष्ठन् , गच्छन् इमे ' शतृ प्रत्ययान्ताः । (Present participles)**

**ङ)** क्रीड् , पिब् , वद् , धातूनां शतृ प्रत्यान्तान् वदत ।

क्रीडन् , पिबन् , वदन् ,

<u>शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary</u>

क्रीडा *f* sport

इदानीं ***in.*** now

तदानीं ***in.*** then

सायाह्नः ***m.*** evening time

क्रीडाङ्गणं ***n.*** playground

कन्दुकः ***m.*** ball

क्रीडन्ति ***P.*** (they) play

चर्मं ***n.*** leather

स्विद्यति sweats

वातः ***m*** air , wind

भूयोऽपि ***in.*** again

ताड्यमानः ***p. participle*** being beaten

उत्पतति ***P.*** goes up

इतस्ततः ***in.*** here and there

श्रान्तः ***p.p.*** tired

गात्रं ***n.*** body

मुहूर्तं ***n.*** a while